# Lesson 61 A B C

## Faith in the Guru

I've dared to label this lesson 61 ABC because it incorporates a story and a set of exercises for you as well. To make things easier, I've marked the sandhis bold. Please try and break the sandhis.

### गुरौ निष्ठा ।

Story contributed by Smt. Shilpa Mudur ( Borivli Sabha)

भद्रदायिनी नाम **सरितस्तीरयासीतेक आश्रमः** । **तत्राङ्गिरा नामाचार्यो निवसति** स्म । आश्रमस्य **परिसरोऽत्यन्तः मनोहार्यासीत्** । ईदृशं शान्तं रमणीयं वातावरणं वेदाध्ययनाय युक्तमासीत् । अनेके **विद्यार्थिनस्तत्राध्ययनस्य हेतोर्निवसन्ति** स्म । ते **अङ्गिरसो वेदान् शास्त्राण्युपनिषदान्** च पठन्ति स्म । तेषां शशी, देवनन्दी, अज्ञजयी च मेधाविनः । त्रयोऽपि वेदेषु , शास्त्रेषु च निपुणाः ।

**एकदाङ्गिरास्तानाहूयोक्तवान्** भवतां विद्यागमं **दृष्ट्वाहं** प्रसन्नः । **अतोऽग्राभ्यासाय** मया **भवन्तो वृताः** । किन्तु यदि **काश्चन सिद्धयो लब्धव्यास्तर्हि** मया निर्दिष्टं कार्यं **करणीयमिति** । **त्रिभिर्विद्यार्थिभिः अन्वमन्यत** । **आचार्यस्तेभ्यस्त्रीन्** लघून् **कलशानयच्छत्** तान् **चाश्रमस्य** पार्श्वस्थस्य गिरेः **शिखरमनयत्** । तत्र भूमौ त्रीन् **वर्तुलानालिख्य तेभ्यो एकैकं** स्थानं दत्तम् । **हिमालयातागतात्** कस्माच्चित् सन्यासिनः मया कानिचन बीजानि लब्धानि ।तानि **मयात्र** वपितानि । **प्रतिदिनमुषसि** भवद्भिः सरितः **पय आनीय** आत्मनः **स्थानमष्टाधिकशतेन** पूर्णकलशैः सेक्तव्यम् । यदि अङ्कुरा रोहिष्यन्ति तदा मह्यं सूचना दातव्या **इत्युक्त्वाङ्गिराः** ततः प्रस्थितः । **गुरोराज्ञा** पालितव्या । अतः **परेद्युरेव** त्रिभिः स्वस्थानस्य **सिञ्चनमारब्धम्** । **दिनान्यतीतानि** । यद्यपि नियमानुसारसेचनं कृतं **तथाप्येकोऽप्यङ्कुरो न दृष्टः** । विद्यार्थिनां मनसि शङ्का जाता ।गुरुणायोग्यं स्थानं न दत्तं स्यात् ।अत्र बीजानि सन्ति खलु? अज्ञजयिना चिन्तितं यत् गुरुः न शङ्कनीयः । अतः सः स्वकार्यात् न विरतः । किन्तु शशी देवनन्दी **चाङ्गिरसं निकषागच्छतां** तं **चापृच्छतां,** षट् **मासाभवन्** । **भवतो निर्देशानुसारं** वयं प्रतिदिनं स्वस्थानं पयसा सिञ्चामः । किन्तु तत्र रोपस्य **लक्षणमपि नास्तीति** । अङ्गिराः शान्तचेतसा तौ श्रुतवान् । सस्मितं **स उक्तवान् , बुद्धिमतो**


© Shri Chitrapur Math

**विद्यार्थिन ईदृश्यपेक्षा नासीत्** इति । तदनन्तरं तेन तस्मात् अधिकं साहाय्यं न दत्तम् । शशिना निश्चय: कृत: यत् अधिकेन श्रमेण किं प्रयोजनम् । श्व: **प्रभृत्यहं** क्षेत्रे **पयो न निपतिष्यामीति** । देवनन्दी किञ्चित् **क्षम्यासीत्** । अत इतोऽपि कालार्थं तेन **गुरोराज्ञा** पालिता । अत्रान्तरे गुरुणा किमपि नूतनं
**नाध्यापितम्** । एतस्मात् कारणात् **शश्याश्रमात्** निर्गत: ।
द्वे **वर्षेऽभवताम्** । इदानीं **देवनन्द्यप्याशङ्कितोऽभवत्** ।अद्य यावत् किमपि बीजं वर्धितव्यम् ।अधिकेन पयसा **बीजमेव** मृतं स्यात् इति **सोऽचिन्तयत्** । शनै: शनै: तस्य **सेचनकार्यमनियतं** जातम् । **चतुर्भ्यो वर्षेभ्योऽनन्तरं देवनन्दिनापि प्रस्थानस्येच्छा** प्रकटीकृता । **अङ्गिरसानुज्ञा** दत्ता ।
**अज्ञजयिनस्तु** साधना नियमानुसारिणी **प्रवर्तमानासीत्** । धृतिमान् स: प्रतिदिनं **ब्रह्ममुहूर्तयुत्थाय** सूर्योदयात् **प्राकष्टाधिकशतवारं** भद्रदायिन्या: सरित: **पयो गृहीत्वा** गिरिमारुह्य बीजानां सेचनं करोति स्म । ईदृशं **द्वादशवर्षाण्यतीतानि** । एकस्मिन् दिने तेन एको हरित् **बिन्दुर्दृष्ट:**। ईषत् **कालानन्तरमेक: पालवो भूम्या आरोहत्** । तं **दृष्ट्वाज्ञजयिनश्चक्षुर्भ्यामश्रुधारा** प्रसृता । झटिति **तेनाङ्गिरसे** शुभवार्ता कथिता । अङ्गिरा: उक्तवान् सा एका **विशिष्टौषधि:** ( special herb)अस्ति या अनेकान् रोगान् निवारयति । सा **द्वादशभ्यो वर्षेभ्योऽनन्तरं** प्ररोहति । अपि तु **तस्या बीजानि** सावधानं रक्षितव्यानि पोषितव्यानि च । **तथाप्यस्मासु** सिद्धिप्राप्ति: सम्भवनीया । तस्या: कृते तु गुरौ निष्ठा **स्थापनीयाविरतसाधना** च कर्तव्या । अचिरात् फलं न प्राप्यते । अस्माभि: तु **प्रयत्नो न** त्यक्तव्य: । यदा गुरुकृपा भवति तदा फलमवश्यं **लभ्यत इति** ।


© Shri Chitrapur Math